# Shri Chiranjivi Ramayanam

# શ્રીચિરઞ્જીવિરામાયણમ્

## Document Information

Text title : Shri Chiranjivi Ramayanam

File name : chiranjIvirAmAyaNam.itx

Category : raama

Location : doc_raama

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : From stotrArNavaH

Latest update : September 12, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 12, 2020

*sanskritdocuments.org*

# શ્રીચિરઞ્જીવિરામાયણમ્

પાયાત્ ક્ષીરાબ્ધિશાયી કમલભવનુતઃ કોસલેન્દ્રસ્ય પુત્રો
રામઃ સૌમિત્રિયુક્તઃ કુશિકસુતગિરા તાટકાપ્રાણહારી ।
યજ્ઞં નિર્વર્ત્ય ગઙ્ગાસુચરિતમુદિતઃ પાવયંસ્તામહલ્યાં
સીતામુદ્વાહ્ય જિત્વા પથિ ભૃગુતનયં પ્રાપ્ય હર્ષાદયોધ્યામ્ ॥ ૧॥

શ્રીરામં નૌમિ કૈકેય્યભિલષિતવરાત્ ખિન્નમાલોક્ય તાતં
તદ્વાચા ત્યક્તરાજ્યં ઝટિતિ વનગતં મૈથિલીલક્ષ્મણાભ્યામ્ ।
સ્વર્ગસ્થે રાજ્ઞિ શોકાત્ કૃતનુતિભરતપ્રાર્થનાત્ પાદુકે સ્વે
દત્ત્વાસ્મૈ તન્નિવૃત્ત્યા સ્થિતમનુજયુતં સેવિતં ચિત્રકૂટે ॥ ૨॥

હત્વારણ્યે વિરાધં મુનિનિકરમુદે પઞ્ચવટ્યામુષિત્વા
વૈરૂપ્યાત્ શૂર્પણખ્યા(ઃ)નિશિત (કુપિત)ખરમુખાન્ ધ્વંસયિત્વાર્ધયામમ્ ।
મારીચં મર્દયિત્વા દશવદનહૃતાં તત્ર સીતામદૃષ્ટ્વા
દગ્ધ્વા ક્રુદ્ધં કબન્ધં શબરિવનિતયા પૂજિતં રામમીડે ॥ ૩॥

પમ્પાતીરે હનૂમત્પટુતરવચનાદૃશ્યમૂકં ચ ગત્વા
કૃત્વા સુગ્રીવસખ્યં નિશિતશરવરૈઃ સપ્તસાલાંશ્ચ ભિત્ત્વા ।
હત્વા સુત્રામપુત્રં દિનકરજનુષસ્તસ્ય રાજ્યં ચ દત્ત્વા
તેનાનીતૈઃ કપીશૈર્વિદિત(વિચિત)સકલભૂમણ્ડલં રામમીડે ॥ ૪॥

સેતું બદ્ધ્વા સમુદ્રે સકલબલયુતં રાવણં કુમ્ભકર્ણં
હત્વા તત્પુત્રવર્ગં તદનુજમભિષિચ્યાથ લઙ્કાધિનાથમ્ ।
સીતાં લબ્ધ્વાગ્નિશુદ્ધાં સકલસુરનુતં પુષ્પયાનાધિરૂઢં
સુગ્રીવાદ્યૈરુપેતં રઘુપતિમનિશં પ્રાપ્તરાજ્યં નમામિ ॥ ૫॥

સકૃદપિ યદિ રામેત્યુચ્ચરન્ યસ્તુ મર્ત્યઃ
સકલદુરિતસઙ્ઘૈઃ સંયુતો વાપિ નૂનમ્ ।
ન નિવસતિ સ માતુર્ગર્ભવાસી કદાચિ-
ન્નિવસતિ હરિલોકે નાસ્તિ સન્દેહલેશઃ ॥ ૬॥

ઇતિ શ્રીચિરઞ્જીવિરામાયણં સમ્પૂર્ણમ્ ।

Proofread by Aruna Narayanan

*Shri Chiranjivi Ramayanam*
pdf was typeset on September 12, 2020

Please send corrections to *sanskrit@cheerful.com*